श्रीबगला(वल्गा)मुखीस्तोत्रम्

{॥ श्रीबगला(वल्गा)मुखीस्तोत्रम् ॥}

श्रीगणेशाय नमः ।

चलत्कनककुण्डलोल्लसितचारुगण्डस्थलीं

लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम् ।

गदाहतविपक्षकां कलितलोलजिह्वांचलां

स्मरामि बगलामुखीं विमुखवाङ्मनस्स्तम्भिनीम् ॥ १॥

पीयूषोदधिमध्यचारुविलद्रक्तोत्पले मण्डपे

सत्सिंहासनमौलिपातितरिपुं प्रेतासनाध्यासिनीम् ।

स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां विभ्रतीमित्थं

ध्यायति यान्ति तस्य सहसा सद्योऽथ सर्वापदः ॥ २॥

देवि त्वच्चरणाम्बुजार्चनकृते यः पीतपुष्पाञ्जलीन्भक्त्या

वामकरे निधाय च मनुं मन्त्री मनोज्ञाक्षरम् ।

पीठध्यानपरोऽथ कुम्भकवशाद्बीजं स्मरेत्पार्थिवं

तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत्तत्क्षणात् ॥ ३॥

वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति क्रोधी

शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति ।

गर्वी खर्वति सर्वविच्च जडति त्वन्मन्त्रिणा यन्त्रितः

श्रीर्नित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः ॥ ४॥

मन्त्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रं च ते
यन्त्रं वादिनियन्त्रणं त्रिजगतां जैत्रं च चित्रं च ते ।
मातः श्रीबगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे
त्वन्नामग्रहणेन संसदि मुखे स्तम्भो भवेद्वादिनाम् ॥ ५॥

दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं
भूभृत्सन्दमनं चलन्मृगदृशां चेतःसमाकर्षणम् ।
सौभाग्यैकनिकेतनं समदृशः कारुण्यपूर्णेक्षणम्
मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः ॥ ६॥

मातर्भञ्जय मद्विपक्षवदनं जिह्वां च सङ्कीलय
ब्राह्मीं मुद्रय दैत्यदेवधिषणामुग्रां गतिं स्तंभय ।
शत्रूंश्चूर्णय देवि तीक्ष्णगदया गौराङ्गि पीताम्बरे
विघ्नौघं बगले हर प्रणमतां कारुण्यपूर्णेक्षणे ॥ ७॥

मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये
श्रीविद्ये समये महेशि बगले कामेशि वामे रमे ।
मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे
दासोऽहं शरणागतः करुणया विश्वेश्वरि त्राहि माम् ॥ ८॥

संरम्भे चौरसङ्घे प्रहरणसमये बन्धने व्याधिमध्ये

विद्यावादे विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम् ।

वश्ये वा स्तम्भने वा रिपुवधसमये निर्जने वा वने वा

गच्छंस्तिष्ठंस्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु धीरः ॥ ९॥

त्वं विद्या परमा त्रिलोकजननी विघ्नौघसंछेदिनी

योषित्कर्षणकारिणी जनमनःसम्मोहसन्दायिनी ।

स्तम्भोत्सारणकारिणी पशुमनःसम्मोहसन्दायिनी

जिह्वाकीलनभैरवी विजयते ब्रह्मादिमन्त्रो यथा ॥ १०॥

विद्या लक्ष्मीर्नित्यसौभाग्यमायुः पुत्रैः पौत्रैः सर्वसाम्राज्यसिद्धिः ।

मानो भोगो वश्यमारोग्यसौख्यं प्राप्तं तत्तद्भूतलेऽस्मिन्नरेण ॥ ११॥

त्वत्कृते जपसन्नाहं गदितं परमेश्वरि ।

दुष्टानां निग्रहार्थाय तद्गृहाण नमोऽस्तु ते ॥ १२॥

पीताम्बरां च द्विभुजां त्रिनेत्रां गात्रकोमलाम् ।

शिलामुद्गरहस्तां च स्मरे तां बगलामुखीम् ॥ १३॥

ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु विश्रुतम् ।

गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित् ॥ १४॥

नित्यं स्तोत्रमिदं पवित्रमिह यो देव्याः पठत्यादराद्धृत्वा

यन्त्रमिदं तथैव समरे बाहौ करे वा गले ।

राजानोऽप्यरयो मदान्धकरिणः सर्पा मृगेन्द्रादिकास्ते

वै यान्ति विमोहिता रिपुगणा लक्ष्मीः स्थिरा सिद्धयः ॥ १५॥

॥ इति श्रीरुद्रयामले तन्त्रे श्रीबगलामुखीस्तोत्रं समाप्तम् ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Baglamukhi Stotram Lyrics in Devanagari PDF
% File name : bagalAmukhIstotram.itx
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : rudrayAmale tantre
% Latest update : March 31, 2005
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [December 12, 2015] at Stotram Website